**CBSE कक्षा - 9 संस्कृत**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठः - 4 कल्पतरुः**

**अभ्यासः**

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **कञ्चनपुरं नाम नगरं कुत्र विभाति स्म?**
   ii. **जीमूतकेतुः किं विचार्य जीमूतवाहनं यौवराज्ये अभिषिक्तवान्?**
   iii. **कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः किम् अचिन्तयत्?**
   iv. **पाठानुसारं संसारेऽस्मिन् किं किं नश्वरम् किञ्च अनश्वरम्?**
   v. **जीमूतवाहनस्य यशः सर्वत्र कथं प्रथितम्?**

   **उत्तराणि-**
   i. कञ्चनपुरं नाम नगरं हिमवतः (हिमालयस्य) सानोरुपरि (शिखरस्य उपरि) विभाति स्म।
   ii. जीमूतवाहनः गुणसंम्पन्नः सम्प्राप्तयौवनः च' इति विचार्य जीमूतकेतुः जीमूतवाहनं यौवराज्ये अभिषिक्तवान्।
   iii. कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः अचिन्तयत् - "अहो! मम पूर्वजैः ईदृशम् अमरपादम् प्राप्य धनात् अतिरिक्तं किमपि न लब्धम्। अहम् अभीष्टं मनोरथं साधयिष्यामि।"
   iv. पाठानुसारं संसारेऽस्मिन् धनं शरीरं च नश्वरम् परोपकारः च अनश्वरः।
   v. जीमूतवाहनस्य यशः सर्वजीवानुकम्पया सर्वत्र प्रथितम्।

2. **अधोलिखितवाक्येषु स्थूलपदानि कस्मै प्रयुक्तानि?**
   i. **तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्।**
   ii. **राजा सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान्?**
   iii. **अयं तव सदा पूज्यः।**
   iv. **तात ! त्वं तु जानासि यत् धनं वीचिवच्चञ्चलम्।**

   **उत्तराणि-**
   i. 'हिमवतः' इतिकृते
   ii. 'जीमूतवाहनम्' इति कृते
   iii. 'कल्पतरुः' इति कृते
   iv. 'जीमूतकेतुः' इति कृते

3. **अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत -**
   i. **पर्वतः - ..........................**
   ii. **भूपतिः - ..........................**
   iii. **इन्द्रः - ..........................**

iv. **धनम् - ..........................**
v. **इच्छितम् - ..........................**
vi. **समीपम् - ..........................**
vii. **धरित्रीम् - ..........................**
viii. **कल्याणम् - ..........................**
ix. **वाणी - ..........................**
x. **वृक्षः - ..........................**

**उत्तराणि-**

i. नगेन्द्रः
ii. राजा
iii. शक्रः
iv. अर्थः
v. अभीष्टम्
vi. अन्तिकम्
vii. पृथ्वीम्
viii. परोपकारः, हितम्
ix. वाक्
x. तरुः, पादपः

4. **'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि। तानि समुचितं योजयत-**

| ‘क’ स्तम्भ | ‘ख’ स्तम्भ |
|---|---|
| **कुलक्रमागतः** | **परोपकारः** |
| **दानवीरः** | **मन्त्रिभिः** |
| **हितैषिभिः** | **जीमूतवाहनः** |
| **वीचिवच्चञ्चलम्** | **कल्पतरुः** |
| **अनश्वरः** | **धनम्** |

**उत्तराणि-**

| ‘क’ स्तम्भ | ‘ख’ स्तम्भ |
|---|---|
| कुलक्रमागतः | कल्पतरुः |
| दानवीरः | जीमूतवाहनः |

| | |
|---|---|
| हितैषिभिः | मन्त्रिभिः |
| वीचिवच्चञ्चलम् | धनम् |
| अनश्वरः | परोपकारः |

5. **(क) "स्वस्ति तुभ्यम्" स्वस्ति शब्दस्य योगे चतुर्थी विभक्तिः भवति। इत्यनेन नियमेन अत्र चतुर्थी विभक्तिः प्रयुक्ता। एवमेव (कोष्ठकगतेषु पदेषु) चतुर्थी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-**
   i. **स्वस्ति ...................... (राजा)**
   ii. **स्वस्ति ...................... (प्रजा)**
   iii. **स्वस्ति ...................... (छात्र)**
   iv. **स्वस्ति ...................... (सर्वजन)**

   **उत्तराणि-**
   i. राज्ञे
   ii. प्रजायै/प्रजाभ्यः
   iii. छात्राय/छात्रेभ्यः
   iv. सर्वजनेभ्यः

   **(ख) कोष्ठकगतेषु पदेषु षष्ठी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-**
   i. **तस्य ............. उद्याने कल्पतरुः आसीत्। (गृह)**
   ii. **सः ............. अन्तिकम् अगच्छत्। (पितृ)**
   iii. **............. सर्वत्र यशः प्रथितम्। (जीमूतवाहन)**
   iv. **अयं ............. तरुः? (किम्)**

   **उत्तराणि-**
   i. गृहस्य
   ii. पितुः
   iii. जीमूतवाहनस्य
   iv. कस्य

6. **स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**
   i. **<u>तरोः</u> कृपया सः पुत्रम् प्राप्नोत्।**
   ii. **सः <u>कल्पतरवे</u> न्यवेदयत्।**
   iii. **<u>धनवृष्ट्या</u> कोऽपि दरिद्रः नातिष्ठत्।**
   iv. **कल्पतरुः <u>पृथिव्यां</u> धनानि अवर्षत्।**
   v. **<u>जीवानुकम्पया</u> जीमूतवाहनस्य यशः प्रासरत्।**

   **उत्तराणि-**
   i. <u>कस्य</u> कृपया सः पुत्रम् प्राप्नोत्।

ii. सः <u>कस्मै</u> न्यवेदयत्।

iii. <u>कया</u> कोऽपि दरिद्रः नातिष्ठत्।

iv. कल्पतरुः <u>कस्यां</u> धनानि अवर्षत्।

v. <u>कया</u> जीमूतवाहनस्य यशः प्रासरत्।

7. **(क) यथास्थानं समासं विग्रहं च कुरुत-**

i. **विद्याधराणां पतिः ....................**

ii. **................................ गृहोद्याने**

iii. **नगानाम् इन्द्रः .........................**

iv. **.............................. परोपकारः**

v. **जीवानाम् अनुकम्पया ...............**

**उत्तराणि-**

i. विद्याधरपतिः

ii. गृहस्य उद्याने

iii. नगेन्द्रः

iv. परेषाम् उपकारः

v. जीवानुकम्पया

**(ख) उदाहरणमनुसृत्य मतुप् (मत्, वत्) प्रत्ययप्रयोगं कृत्वा पदानि रचयत-**

**यथा-** हिम + मतुप् = हिमवान्

श्री + मतुप् = श्रीमान्

i. शक्ति + मतुप् = .........................

ii. धन + मतुप् = .........................

iii. बुद्धि + मतुप् = .........................

iv. धैर्य + मतुप् = .........................

v. गुण + मतुप् = .........................

**उत्तराणि-**

i. शक्तिमान्

ii. धनवान्

iii. बुद्धिमान्

iv. धैर्यवान्

v. गुणवान्